# Shri Ramanandiyadvaracharya Stava

# श्रीरामानन्दीयद्वाराचार्यस्तवः

## Document Information

Text title : Shri Ramanandiyadvaracharya Stava

File name : rAmAnandIyadvArAchAryastavaH.itx

Category : deities_misc, rAmAnanda, stava, gurudev

Location : doc_deities_misc

Author : vaiShNavAchAryavedAntapIThAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# श्रीरामानन्दीयद्वाराचार्यस्तवः

आनन्दभाष्यमर्मज्ञमात्मानात्मप्रबोधकम् ।
अनन्तानन्दमानामानं द्वाराचार्यं नमाम्यहम् ॥ १॥

रामानन्दकृतानन्दभाष्यत्रयप्रचारकम् ।
श्रीमत्सुरसुरानन्दं द्वाराचार्यं नमाम्यहम् ॥ २॥

रक्षकं सम्प्रदायस्यानन्दभाष्यस्य शिक्षकम् ।
श्रीभावानन्दनामानं द्वाराचार्यं नमाम्यहम् ॥ ३॥

निरस्य दम्भिनां दम्भं रामकीर्त्तनकारकम् ।
रामकबीरनामानं द्वाराचार्यं नमाम्यहम् ॥ ४॥

रहस्यत्रयबोद्धारं श्रीसम्प्रदायरक्षकम् ।
श्रीसुखानन्दनामानं द्वाराचार्यं नमाम्यहम् ॥ ५॥

रामानन्दीयधर्माब्धेर्वर्धकं विधुमुत्तमम् ।
श्रीपीपाचार्यनामानं द्वाराचार्यं नमाम्यहम् ॥ ६॥

श्रीरामानन्दभाष्यस्य शिक्षकं धर्मरक्षकम् ।
नृहर्यानन्दनामान्नं द्वाराचार्यं नमाम्यहम् ॥ ७॥

दीक्षितं धर्मरक्षायां भक्तियोगोपदेशकम् ।
श्रीयोगानन्दनामानं द्वाराचार्यं नमाम्यहम् ॥ ८॥

श्रीरामतारकं दत्त्वा तारकं हि भवाम्बुधेः ।
श्रीकीलाचार्यनामानं द्वाराचार्यं नमाम्यहम् ॥ ९॥

रहस्यत्रयवक्तारं रामभक्तिरसाम्बुदम् ।
श्रीअग्राचार्यनामानं द्वाराचार्यं नमाम्यहम् ॥ १०॥

रामानन्दकृतानन्दभाष्याम्भोजस्य भास्करम् ।
श्रीटीलाचार्यनामानं द्वाराचार्यं नमाम्यहम् ॥ ११॥

अप्रतिद्वन्दिनं वादे विशिष्टाद्वैतवादिनम् ।
श्रीमदनुभवानन्दं द्वाराचार्यं नमाम्यहम् ॥ १२॥

शिक्षकं भक्तभक्तेश्च भक्तमालाविधायकम् ।
श्रीनाभाचार्यनामानं द्वाराचार्यं नमाम्यहम् ॥ १३॥

वचस्तम्भनकर्त्तारं वादिनां वादसङ्गरे ।
श्रीरामस्तम्भनाचार्यं द्वाराचार्यं नमाम्यहम् ॥ १४॥

रामभक्तिप्रदानेन भुक्तिमुक्तिप्रदं नृणाम् ।
श्रीमद्दिवाकराचार्य द्वाराचार्यं नमाम्यहम् ॥ १५॥

राघवभक्तिदातारं राघवदासनामकम् ।
श्रीयुतखोजिदेवार्य द्वाराचार्यं नमाम्यहम् ॥ १६॥

अर्थपञ्चकबोद्धारं वैष्णवधर्मरक्षकम् ।
श्रीकूबाचार्यनामानं द्वाराचार्यं नमाम्यहम् ॥ १७॥

तत्त्वत्रयोपदेष्टारं रहस्यत्रयवेदिनम् ।
श्रीतनतुलसीदासं द्वाराचार्यं नमाम्यहम् ॥ १८॥

श्रीमद्वैष्णवधर्मस्य रक्षकं तत्त्वेदिनम् ।
लालतुरङ्गिनामानं द्वाराचार्यं नमाम्यहम् ॥ १९॥

सिद्धवादिविजेतारं विशिष्टाद्वैतरक्षकम् ।
श्रीमन्मुरारिदेवार्य द्वाराचार्यं नमाम्यहम् ॥ २०॥

आनन्दभाष्यतत्त्वज्ञं सन्तोषामृतवारिधिम् ।
श्रीमन्मलूकदासार्यं द्वाराचार्यं नमाम्यहम् ॥ २१॥

जनानां मुक्तिदातारं राममन्त्रं प्रदाय हि ।
श्रीमद्भडङ्गिदेवार्यं द्वाराचार्यं नमाम्यहम् ॥ २२॥

सद्रहस्योपदेष्टारं धार्मिकं धर्मकोविदम् ।
राघवचेतनाचार्य द्वाराचार्यं नमाम्यहम् ॥ २३॥

महासिद्धं महप्राज्ञं रामोपासनकारकम् ।
भगवन्नारायणर्यं द्वाराचार्यं नमाम्यहम् ॥ २४॥

आत्मानात्मपरात्मज्ञमानन्दभाष्यपण्डितम् ।
पूर्णविराठिदेवार्यं द्वाराचार्यं नमाम्यहम् ॥ २५॥

रहस्यत्रयवेत्तारमर्थपञ्चकबोधकम् ।
श्रीरामरावलाचार्यं द्वाराचार्यं नमाम्यहम् ॥ २६॥

श्रीसम्प्रदायधर्मस्य रक्षकं धर्मशिक्षकम् ।
श्रीमधनुमदाचार्यं द्वाराचार्यं नमाम्यहम् ॥ २७॥

श्रीरामानन्दधर्मस्य रक्षाकर्मणि दीक्षितम् ।
श्रीदुन्दुरामनामानं द्वाराचार्यं नमाम्यहम् ॥ २८॥

मुद्रामालादिसंस्काराद्भुतमाहात्म्यदर्शकम् ।
श्रीकाल्रूरामनामानं द्वाराचार्यं नमाम्यहम् ॥ २९॥

कर्मबन्धच्छिदं भक्त्या रामभक्तिप्रदं नृणाम् ।
श्रीकर्मचन्द्रनामानं द्वाराचार्यं नमाम्यहम् ॥ ३०॥

श्रीरामायणमर्मज्ञं वेदवेदान्तपारगम् ।
रामरामायणीत्याख्यं द्वाराचार्यं नमाम्यहम् ॥ ३१॥

हठाज्जितेन्द्रियं प्राज्ञं रामपादाब्जभक्तिदम् ।
हठीनारायणाचार्यं द्वाराचार्यं नमाम्यहम् ॥ ३२॥

ब्रह्मविद्यानिधिं रामब्रह्मोपासनतत्परम् ।
श्रीजङ्गिदेवनामानं द्वाराचार्यं नमाम्यहम् ॥ ३३॥

श्रीरामानन्दभाष्यज्ञं विशिष्टाद्वैतसाधकम् ।
श्रीयुतालखरामार्यं द्वाराचार्यं नमाम्यहम् ॥ ३४॥

श्रीरामकीर्त्तनासक्तं सिद्धवन्द्यं तपोनिधिम् ।
श्रीरामरङ्गिनामानं द्वाराचार्यं नमाम्यहम् ॥ ३५॥

आनन्दभाष्यतत्त्वज्ञं विजेतारं च वादिनाम् ।
श्रीलाहारामनामानं द्वाराचार्यं नमाम्यहम् ॥ ३६॥

वैष्णवभाष्यकार श्रीवैष्णवाचार्यनिर्मितः ।
द्वाराचार्यस्तवो भूयात् सर्वकल्याणकारकः ॥ ३७॥

इति श्रीवैष्णवाचार्यवेदान्तपीठाचार्यप्रणीतः
श्रीरामानन्दीयद्वाराचार्यस्तवः सम्पूर्णः ।

Encoded and proofread by Mrityunjay Pandey

*Shri Ramanandiyadvaracharya Stava*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*